# भक्तियोगः (bhakti-yogaḥ)

| | | |
|---|---|---|
| ॐ श्रीपरमात्मने नमः। अथ द्वादशोऽध्यायः। भक्तियोगः।<br>om śrīparamātmane namaḥ. atha dvādaśo'dhyāyaḥ. bhaktiyogaḥ. | | |
| 1. | अर्जुन उवाच।<br>एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।<br>येचाप्यक्षरमव्यक्तम् तेषां के योगवित्तमाः॥ | arjuna uvāca<br>evaṁ satatayuktā ye<br>bhaktāstvāṁ paryupāsate<br>yecāpyakṣaramavyaktam<br>teṣāṁ ke yogavittamāḥ |
| 2. | श्रीभगवानुवाच।<br>मय्यावेश्य मनो ये माम् नित्ययुक्ता उपासते।<br>श्रद्धया परयोपेताः ते मे युक्ततमा मताः॥ | śrībhagavānuvāca<br>mayyāveśya mano ye mām<br>nityayuktā upāsate<br>śraddhayā parayopetāḥ<br>te me yuktatamā matāḥ |
| 3. | ये त्वक्षरमनिर्देश्यम् अव्यक्तं पर्युपासते।<br>सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥ | ye tvakṣaramanirdeśyam<br>avyaktaṁ paryupāsate<br>sarvatragamacintyaṁ ca<br>kūṭasthamacalaṁ dhruvam |
| 4. | सन्नियम्येन्द्रियग्रामम् सर्वत्र समबुद्धयः।<br>ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ | sanniyamyendriyagrāmam<br>sarvatra samabuddhayaḥ<br>te prāpnuvanti māmeva<br>sarvabhūtahite ratāḥ |
| 5. | क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।<br>अव्यक्ता हि गतिर्दुःखम् देहवद्भिरवाप्यते॥ | kleśo'dhikatarasteṣām<br>avyaktāsaktacetasām<br>avyaktā hi gatirduḥkham<br>dehavadbhiravāpyate |
| 6. | ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।<br>अनन्येनैव योगेन मां ध्यायन्त उपासते॥ | ye tu sarvāṇi karmāṇi<br>mayi sannyasya matparāḥ<br>ananyenaiva yogena<br>māṁ dhyāyanta upāsate |
| 7. | तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।<br>भवामि नचिरात्पार्थ मय्यावेशितचेतसाम्॥ | teṣāmahaṁ samuddhartā<br>mṛtyusaṁsārasāgarāt<br>bhavāmi nacirātpārtha<br>mayyāveśitacetasām |

| | | |
|---|---|---|
| 8. | मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।<br>निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥ | mayyeva mana ādhatsva<br>mayi buddhiṁ niveśaya<br>nivasiṣyasi mayyeva<br>ata ūrdhvaṁ na saṁśayaḥ |
| 9. | अथ चित्तं समाधातुम् न शक्नोषि मयि स्थिरम्।<br>अभ्यासयोगेन ततः मामिच्छाप्तुं धनञ्जय॥ | atha cittaṁ samādhātum<br>na śaknoṣi mayi sthiram<br>abhyāsayogena tataḥ<br>māmicchāptuṁ dhanañjaya |
| 10. | अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।<br>मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि॥ | abhyāse'pyasamartho'si<br>matkarmaparamo bhava<br>madarthamapi karmāṇi<br>kurvansiddhimavāpsyasi |
| 11. | अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।<br>सर्वकर्मफलत्यागम् ततः कुरु यतात्मवान्॥ | athaitadapyaśakto'si<br>kartuṁ madyogamāśritaḥ<br>sarvakarmaphalatyāgam<br>tataḥkuru yatātmavān |
| 12. | श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते।<br>ध्यानात्कर्मफलत्यागः त्यागाच्छान्तिरनन्तरम्॥ | śreyo hi jñānamabhyāsāt<br>jñānāddhyānaṁ viśiṣyate<br>dhyānātkarmaphalatyāgaḥ<br>tyāgācchāntiranantaram |
| 13. | अद्वेष्टा सर्वभूतानाम् मैत्रः करुण एव च।<br>निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥ | adveṣṭā sarvabhūtānām<br>maitraḥ karuṇa eva ca<br>nirmamo nirahaṅkāraḥ<br>samaduḥkhasukhaḥ kṣamī |
| 14. | सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।<br>मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः॥ | santuṣṭaḥ satataṁ yogī<br>yatātmā dṛḍhaniścayaḥ<br>mayyarpitamanobuddhiḥ<br>yo madbhaktaḥ sa me priyaḥ |
| 15. | यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः।<br>हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः॥ | yasmānnodvijate lokaḥ<br>lokānnodvijate ca yaḥ<br>harṣāmarṣabhayodvegaiḥ<br>mukto yaḥ sa ca me priyaḥ |

| | | |
|---|---|---|
| 16. | अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः।<br>सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥ | anapekṣaḥ śucirdakṣaḥ<br>udāsīno gatavyathaḥ<br>sarvārambhaparityāgī<br>yo madbhaktaḥ sa me priyaḥ |
| 17. | यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।<br>शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ | yo na hṛṣyati na dveṣṭi<br>na śocati na kāṅkṣati<br>śubhāśubhaparityāgī<br>bhaktimānyaḥ sa me priyaḥ |
| 18. | समः शत्रौ च मित्रे च तथा मानापमानयोः।<br>शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥ | samaḥ śatrau ca mitre ca<br>tathā mānāpamānayoḥ<br>śītoṣṇasukhaduḥkheṣu<br>samaḥ saṅgavivarjitaḥ |
| 19. | तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।<br>अनिकेतः स्थिरमतिः भक्तिमान्मे प्रियो नरः॥ | tulyanindāstutirmaunī<br>santuṣṭo yena kenacit<br>aniketaḥ sthiramatiḥ<br>bhaktimānme priyo naraḥ |
| 20. | ये तु धर्म्यामृतमिदम् यथोक्तं पर्युपासते।<br>श्रद्दधाना मत्परमाः भक्तास्तेऽतीव मे प्रियाः॥ | ye tu dharmyāmṛtamidam<br>yathoktaṁ paryupāsate<br>śraddadhānā matparamāḥ<br>bhaktāste'tīva me priyāḥ |

ॐ तत्सत्।

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

भक्तियोगो नाम द्वादशोऽध्यायः॥

श्रीकृष्णार्पणमस्तु॥

om tatsat

iti śrīmadbhagavadgītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde

bhaktiyogo nāma dvādaśo'dhyāyaḥ

śrīkṛṣṇārpaṇamastu